# Shri Sharabha Sahasranama Stotram

# શ્રીશરભસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : sharabheshvarasahasranAmastotram 1 sharabhasAluvapakShirAjasahasranAma

File name : sharabhasahasra.itx

Category : sahasranAma, shiva, stotra

Location : doc_shiva

Author : Traditional

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar, PSA Easwaran

Description-comments : AkAshabhairavakalpa

Latest update : Noember 26, 2019, July 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીશરભસહસ્રનામસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
શ્રીદેવ્યુવાચ ।
દેવદેવ મહાદેવ ભક્તાનુગ્રહકારક ।
દુર્લભા શારભીવિદ્યા ગુહ્યાદ્ગુહ્યતરા પરા ॥ ૧॥

ગુટિકા પાદુકા સિદ્ધિસ્તથા સિદ્ધિશ્ચ ખેચરી ।
શાપાનુગ્રહસામર્થ્યા પરકાયાપ્રવેશને ॥ ૨॥

સદ્યઃ પ્રત્યક્ષકામાર્થં કૈર્ન સેવ્યા સુરાસુરૈઃ ।
શ્રીશિવ ઉવાચ । (શ્રીમહાદેવ ઉવાચ)
લક્ષવારસહસ્રાણિ વારિતાસિ પુનઃ પુનઃ ॥ ૩॥

સ્ત્રીસ્વભાવાન્મહાદેવિ પુનસ્ત્વં પરિપૃચ્છસિ ।
મહાગુહ્યં મહાગોપ્યં વાઞ્છાચિન્તામણિઃ સ્મૃતમ્ ॥ ૪॥

ન વક્તવ્યં ત્વયા દેવિ શાપિતાસિ મમોપરિ ।
સર્વસિદ્ધિપ્રદઃ સાક્ષાત્ શરભઃ પરમેશ્વરઃ ॥ ૫॥

તસ્ય નામસહસ્રાણિ તવ સ્નેહાદ્દદામિ તે ।
શૃણુ ચૈકમના ભૂત્વા સાવધાનાવધારય ॥ ૬॥

બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ ઈશઃ કર્તાહમવ્યયઃ ।
મોહનસ્તમ્ભનાકર્ષમારણોચ્ચાટનક્ષમઃ ॥ ૭॥

સિદ્ધિપ્રદમસિદ્ધાનાં જ્ઞાનિનાં જ્ઞાનસિદ્ધિદમ્ ।
મોક્ષપ્રદં મુમુક્ષુણાં નાન્યથા શૃણુ સાદરમ્ ॥ ૮॥

વન્ધ્યા વા કાકવન્ધ્યા વા સદ્યઃ પુત્રપ્રદઃ સ્ત્રિયામ્ ।
સર્વશક્તિયુતો દાતા દયાવાન્ શરભેશ્વરઃ ॥ ૯॥

તસ્ય નામસહસ્રાણિ કથયામિ તવ પ્રિયે ।

ૐ અસ્ય શ્રીશરભસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય,
શ્રીભગવાન્કાલાગ્નિરુદ્રઋષિઃ, વિરાટ્છન્દઃ,
શ્રીશરભેશ્વરપક્ષિરાજો દેવતા, ૐ ખં બીજં,
સ્વાહા શક્તિઃ, ફટ્ ઇતિ કીલકં,
મમ ધર્માર્થકામમોક્ષાર્થે જપે વિનિયોગઃ ।
તત્ર ખાં ઇત્યાદિના કરાઙ્ગન્યાસૌ કુર્યાત્ । તત્ર મન્ત્રઃ -
ૐ ખાં ખાં ખં ફટ્ સર્વશત્રુસંહારણાય શરભસાલુવાય,
પક્ષિરાજાય હું ફટ્ સ્વાહા ઇતિ મન્ત્રઃ ।
ૐ ભૂર્ભુવઃસ્વરોમિતિ દિગ્બન્ધઃ ॥

અથ ધ્યાનમ્ ।
ચન્દ્રાર્કૌ વહ્નિદૃષ્ટિઃ કુલિશવરનખશ્ચઞ્ચલાત્યુગ્રજિહ્વઃ
કાલી દુર્ગા ચ પક્ષૌ હૃદયજઠરગો ભૈરવો વાડવાગ્નિઃ ।
ઊરુસ્થૌ વ્યાધિમૃત્યૂ શરભવરખગશ્ચણ્ડવાતાતિવેગઃ
સંહર્તા સર્વશત્રૂન્સ જયતિ શરભઃ સાલુવઃપક્ષિરાજઃ ॥

ઇતિ ધ્યાનમ્ ।
મૃગસ્ત્વર્દ્ધશરીરેણ પક્ષાભ્યાં ચઞ્ચુના દ્વિજઃ ।
અધોવક્ત્રશ્ચતુઃપાદ ઊર્ધ્વવક્ત્રશ્ચતુર્ભુજઃ ॥

કાલાન્તદહનોપમ્યો નીલજીમૂતનિઃસ્વનઃ ।
અરિસ્તદ્દર્શનાદેવ વિનષ્ટબલવિક્રમઃ ॥

સટાછટોગ્રતુણ્ડાય પક્ષવિક્ષિપ્તભૂભૃતે (નમઃ પક્ષવિક્ષિપ્તમૂર્તયે) ।
અષ્ટપાદાય રુદ્રાય નમઃ શરભમૂર્તયે ॥

ઇતિ ધ્યાત્વા નમસ્કૃત્ય સહસ્રનામ પઠેદિતિ સહસ્રનામપાઠસમ્પ્રદાયઃ ॥

અથ સહસ્રનામાનિ -
ૐ શ્રીં શ્રીં સિદ્ધીશ્વરઃ સાક્ષાત્ ખેં ખેં (ખઁ ખઁ) ગર્વાપહારકઃ ।
હ્રીં હ્રીં સ્પ્રેં સ્ફ્રેં હ્સૌં હ્સૌં જ્લૂં જ્લૂં પક્ષિરાજઃ પ્રતાપવાન્ ॥ ૧॥

હ્રૌં શિવાય ગિરીશાય તારઃ સંસારપારગઃ ।
ગતિદો મતિદઃ શ્રીશઃ ક્લીં ક્લીં કામકલાધરઃ ॥ ૨॥

સિદ્ધિદઃ શરભો યોગી સ્ફ્રૌં શિવઃ સિદ્ધિદાયકઃ ।
સર્વકલ્મષહર્ત્તા ચ ક્રીં ક્રીં કાલકલાધરઃ ॥ ૩॥

પ્રીં પ્રીં પીતામ્બરધરો ભસ્મોદ્ધૂલિતવિગ્રહઃ ।
વ્રીં વ્રીં વિષ્ણુસમારાધ્યઃ સાલુવઃ શક્તિમાન્પ્રભુઃ ॥ ૪॥

વીરવીરાઙ્ગણારાધ્યો (વીરવીરો ગણારાધ્યો) હૂં હૂં સઙ્કુષ્ટખણ્ડનઃ ।
શઙ્કરઃ શઙ્કરારાધ્યો શ્રાં શ્રીં શ્રૂં શરભેશ્વરઃ ॥ ૫॥

ગ્રીં ગ્રીં ગણપતિઃ સેવ્યઃ પક્ષિરાજો મહાભુજઃ ।
ઐં શ્રીં હ્રાં હ્રીં હ્સૌં હ્રીં ક્લીં પરમાત્મા સુરેશ્વરઃ ॥ ૬॥

સ્વાહા શ્રીદો મહાવીરો સર્વઃ સર્વૈનમસ્કૃતઃ ।
ઐં ક્લીં સૌં હ્રૌં (હ્રીં) હ્સ્ફ્રેં (હ્વ્યૈં)
હ્રૈં ખૈં શ્રૈં હ્રૈં પરમેશ્વરઃ ॥ ૭॥

સ્વાહા વિધ્યા નિધાનઃ શ્રીવામદેવઃ પ્રતાપવાન્ ।
ઐં ઐં વાગીશ્વરો દેવો હ્રૈં ક્રૈં ત્રૈં રક્ષકઃ શિવઃ ॥ ૮॥

હ્રીં (હ્રૈં) ફટ્ સ્વાહા વ્યાઘ્રચૌરનાશનઃ સિદ્ધિસંયુતઃ ।
બ્રહ્માવિષ્ણુશિવારાધ્યઃ હ્રીં શિવાપ્રાણવલ્લભઃ ॥ ૯॥

ભ્રૈં ભ્રીં ભસ્મેશ્વરીયુક્તો મૃં મૃં મૃત્યુજયઙ્કરઃ ।
વિશ્વમ્ભરો વિશ્વકર્તા વિશ્વભર્તા ગુરોર્ગુરુઃ ॥ ૧૦॥

ક્લૈં (ક્લીં) હ્રીં સ્વાહા કીર્તિયુક્તો ઈશ્વરઃ સકલાર્થદઃ ।
ગૌરી ગિરા મહાલક્ષ્મી હ્રીં ઐં શ્રીં નિત્યમર્ચિતા ॥ ૧૧॥

ह्लीं ह्लीं સ્વાહા શિવઃ શમ્ભો વાચં વાચામગોચરઃ ।
બ્રહ્મણ્યો બ્રહ્મકૃદ્બ્રહ્મ જૌં જૌં જાગ્રન્મહેશ્વરઃ ॥ ૧૨॥

હ્રૌં હ્રૌં સ્વાહા ધૌતપાપઃ શાન્તાત્મા શઙ્કરઃ (શાઙ્કરઃ)ખગઃ ।
પક્ષીન્દ્રો પક્ષિરાજશ્ચ ભક્તપક્ષકરઃ પરઃ ॥ ૧૩॥

ઉત્કૃષ્ટોત્કૃષ્ટકર્તાઽઽત્મા શ્રીં વિશ્વાત્મા વિભાવસુઃ ।
ક્રીં ખીં ખીં સુમુખાનન્દો ઘ્રૌં ખ્રૌં મ્રૌં પ્રૌં સનાતનઃ ॥૧૪॥

ઐં સ્વાહા શ્રીમહાદેવઃ સૃષ્ટિસ્થિતિલયઙ્કરઃ ।
ઉગ્રતારો મહાતારો વીરતારો જ્વલોજ્જ્વલઃ ॥ ૧૫॥

કાલતારો ધરો લોલજિહ્વાજ્વાલો જ્વલોજ્જ્વલઃ ।
શ્રીં હ્રીં ક્રૈં જ્લૂં હ્સૌં સ્વાહા પાર્વતીશઃ પરાત્પરઃ ॥ ૧૬॥

વરદઃ સાધકાનાઞ્ચ રાજવશ્યં પ્રજાવશી (તી) ।

રૈં રૈં ધ્રૈં ધ્રૈં ધરાભારો હર્તા કર્તા ધુરોધસઃ ॥ ૧૭॥

વેદમન્ત્રાર્થગૂઢાત્મા શાસ્ત્રમન્ત્રાર્થસમ્મતઃ ।
ક્રીં સ્વાહા પરમો દાતા ૐ ૐ નિર્વાણસમ્પદઃ ॥ ૧૮॥

ક્લૌં પ્લૌં હૂં હૂં શિવા સ્વાહા રાજ્ય (જ)ભોગસુખપ્રદઃ ।
સર્વસૌભાગ્યસંયુક્તઃ રાં રીં રૂં રક્તલોચનઃ ॥ ૧૯॥

સમ્પન્નાક્ષો વિપન્નાક્ષઃ ગ્રાં (પ્રાં) ગ્રીં (પ્રીં) જૂં જ્વરમર્દનઃ ।
ક્રીં હ્રીં હૂં (હ્રૂં) ફટ્ પુનઃ સ્વાહા દેવદાનવસેવિતઃ ॥ ૨૦॥

કાલી ક્રીં હ્રીં શિવા દુર્ગા પક્ષદ્વયલસચ્છુભઃ ।
સ્વાહામન્ત્રાન્વિતઃ સત્યઃ સત્યઃ સત્યપરાક્રમઃ ॥ ૨૧॥

ભીમો ભયાનકો દક્ષો દ્રીં દ્રૂં દક્ષમખાપહઃ ।
રોગદોષહરઃ સિદ્ધઃ સિદ્ધિસાધનતત્પરઃ ॥ ૨૨॥

હ્રૌં હ્રીં કાલકાલજ્ઞાની માની દાની સુખાવહઃ ।
હ્રીં ફટ્ સ્વાહા કવિસ્તર્કઃ તર્કવિદ્યાચરઃ પુમાન્ ॥ ૨૩॥

ખર્વાઙ્ગઃ ખેચરીવિદ્યા ખાં ખીં ખૂં ખગતેશ્વરઃ ।
શ્રીં હ્રીં સ્વાહાયુતો દેવો રાજરાજો સુરેશ્વરઃ ॥ ૨૪॥

ઇચ્છાસિદ્ધીશ્વરો દેવો ક્રિયાશક્તિસમન્વિતઃ ।
આં ઈં ઊં જ્ઞાનસંયુક્તો ભગવાન્સર્વસર્વજિત્ ॥ ૨૫॥

ઐં ફટ્ સ્વાહા પઞ્ચતત્ત્વાત્પઞ્ચતન્માત્રસાયકઃ ।
પઞ્ચકૂટાષ્ટકૂટેશો શઙ્કરશ્ચન્દ્રશેખરઃ ॥ ૨૬॥

વાં વીં વૂં (વ્રં) વૈષ્ણવીવિદ્યા શ્રીં શ્રીં સ્વાહા ધરણીધરઃ ।
અવ્યયઃ સર્વકર્તાઽઽત્મા શિવઃ કાલાન્તકો હરઃ ॥ ૨૭॥

ભૂતવેતાલજા બાધા શત્રુબાધા રણોદ્ભવા ।
ખ્રૈં ખ્રૈં (ખૈં ખૈં) હ્રૂં (હૂં) ફટ્ પૂર્ણ
ઘે ઘે (ઘેં ઘેં) સાલુવાય પ્રતાપવાન્ ॥ ૨૮॥

શીઘ્રમારણદેવેશઃ સ્વાહા ચણ્ડપરાક્રમઃ ।
તીક્ષ્ણનખં તીક્ષ્ણદણ્ષ્ટ્રં તીક્ષ્ણરૂપભયઙ્કરઃ (રમ્) ॥ ૨૯॥

તીવ્રભક્તપ્રતાપોગ્રં ક્રૈં ખ્રૌં (ખ્રૈં) સ્વાહા સ્વરૂપકમ્ ।
સભાજિતઃ સભામાન્યઃ સભાસંક્ષોભકારકઃ ॥ ૩૦॥

ક્ષ્મ્રૌં હ્રૌ (હ્રૌં) ક્ષ્મ્રૌ (ક્ષ્મ્રૌં) હ્રૌં
હ્સૌં ખ્રૌં ખ્રૌં સિદ્ધિ (દ્ધ)મન્ત્રનિવેશિતઃ ।
શ્રીં હ્રીં સ્વાહા મહાદેવો આદિદેવો જગન્મયઃ ॥ ૩૧ ॥

સત્કર્તા સત્કૃતાવર્તો ખ્રેં ખ્રે (ખ્રૈ)ઙ્કારો ચિદમ્બરઃ ।
દિગમ્બરો ધરાધીશો છ્રીં છ્રીં સ્વાહા સ્વરૂપધૃક્ ॥ ૩૨ ॥

આદિવિદ્યા જગદ્વિદ્યા ક્લૂં પ્લૂં મ્લૂં હૂં (હું) સુરોન્નતઃ ।
વામદક્ષિણતોરૂપં હ્રીં શ્રીં ક્લીં શઙ્કરોઽવ્યયઃ ॥ ૩૩ ॥

ખ્રૌં (ખ્રૈં) ખ્રૌં હું (હૂં) હું (હૂં)
પુનઃ શ્રીં શ્રીં ગિરિજાપ્રિયદર્શનઃ ।
સ્વાહા વિઘ્નાન્તકઃ (વિધાન્તકઃ) સેવ્યઃ સેવાફલપ્રદાયકઃ ॥ ૩૪ ॥

ચ્રીં ચ્રીં છ્રીં ક્લીં મહાછદ્મ (દ્ય) છલહર્તા છલાપહઃ ।
શ્રીં હ્રીં સ્વાહા શિવઃ શમ્ભુર્દેવાસુરનમસ્કૃતઃ ॥ ૩૫ ॥

કનકાઙ્ગદકો ધીરો મન્ત્રતન્ત્રવરપ્રદઃ ।
મન્ત્રતન્ત્રપરાધીનો મન્ત્રતન્ત્રવિહારકઃ ॥ ૩૬ ॥

ઐં હ્રીં ક્લીં મન્ત્રસન્તુષ્ટો પ્રેં (ફ્રેં) સ્વાહા પરમેશ્વરઃ ।
વિશ્વવ્યાપી ચાવ્યયાત્મા સિદ્ધાચારઃ સુરાર્ચિતઃ ॥ ૩૭ ॥

(વિશ્વવ્યાપ્યપ્રમેયાત્મા સિદ્ધાચૌરૈઃ સુરાર્ચિતઃ)
હ્રીં શ્રીં ક્લીં કમલાનન્દો કાલકાલો નિરામયઃ ।
હૌં (હ્રૌં) શિવાય નમઃ સ્વાહા ભવાનીશો ભયાપહઃ ॥ ૩૮ ॥

જ્રૌં ક્લીં જ્લૂં જ્લૂં હ્સ્પ્રેં (હ્સ્ફ્રૌં) હ્રૌં હ્રાં હ્રાં હંસઃ સ્વરૂપકઃ ।
વિકારહર્તા સર્વજ્ઞો સર્વશત્રુક્ષયઙ્કરઃ ॥ ૩૯ ॥

હૂં હૂં (હૂં હૂં) સ્વાહા મહાદેવો મુનીનાં પ્રાણદાયકઃ ।
સ્ત્રૌઃ હ્રૌં વિરાગી ક્રોધાત્મા ભ્રૂં ભ્રૂં ભસ્મેશ્વરો હરઃ ॥ ૪૦ ॥

લોકપૂજ્યો વિલોમાત્મા માતૃકાપરિ (વર્ણ)ચારકઃ ।
ક્લીં ત્રીં ફટ્ શ્રીં જગદ્ધ (દ્ભ)ર્તા સ્વાહા વિશ્વમ્ભરો હરઃ ॥ ૪૧ ॥

સિદ્ધિદાતાતિરક્તાક્ષો રક્તજિહ્વઃ સહસ્રપાત્ ।
ચણ્ડવાતાદિવેગાત્મા હ્રીં હ્રીં ક્લીં ચણ્ડિકાર્ચિતઃ ॥ ૪૨ ॥

રુણ્ડમાલાધરઃ શ્રીમાન્ હ્રૌં હ્રૌં સ્વાહાખિલેશ્વરઃ ।
ધનધાન્યાગમઃ કર્તા કાલહર્તા મહેશ્વરઃ ॥ ૪૩ ॥

ખેં ખેં હૂં ફટ્ પુનઃ સૌં હ્રૌં ક્લીં સ્વાહા ભૂતપાલકઃ ।
ભૂતાત્મા પરાત્મા ચ દુઃખદુષ્ટદુરાસદઃ (દુઃખો દુષ્ટો દુરાસદઃ) ॥ ૪૪ ॥

સત્યસઙ્કલ્પકર્તાઽઽત્મા ભૂતનાથોઽવ્યયઃ શુચિઃ ।
હ્રીં ક્રીં હ્રીં ક્રીં (ક્રીં ક્રીં) શિવાનન્દો મદિરાનન્દક (ન)ન્દનઃ ॥ ૪૫ ॥

વામવિદ્યાવિહારી ચ ક્રીં સ્વાહા યક્ષતર્પિતઃ ।
હ્રીં સ્વાહા ખા (ખાં)તનુઃ ખા (સ્વા)ત્મા ખૈં ખૈં હૂં ફટ્ સ્વાહા તૃષાપહઃ ॥ ૪૬ ॥

ક્ષુધાતૃષા પહારી ચ ક્ષુધાતૃષ્ણા (ઘ્મા)વિવર્ધનઃ ।
નિરઞ્જનો નિરાકારો નિર્વિકારો ધરાધરઃ ॥ ૪૭ ॥

યન્ત્રમન્ત્રપ્રતાપોગ્રપરકૃત્યાવિનાશનઃ ।
હ્રીં હ્રીં કૃત્યકરઃ શમ્ભુઃ પરકૃત્યાવિષાપહઃ ॥ ૪૮ ॥

આત્મવિદ્યાવિહારી ચ ક્ષુદ્રવિદ્યાવિનાશકઃ ।
શ્રીં ગ્લીં ખૈં (સ્વૈં) ફટ્ પુનઃ સ્વાહા શઙ્ખાસુરવિનાશનઃ (કઃ) ॥ ૪૯ ॥

ત્રાં ત્રૃં (ન્રાં નૃં) નૃસિંહતેજોગ્રાન્ જ્વલો (લ)જ્જ્વલનવર્ચસઃ ।
ખ્રૌં ખ્રૌં ખાં ખાં (ખૈં ખાં ખાં) પુનઃ
પ્રેં પ્રેં (ફ્રેં ફ્રેં) હૂં ફટ્ સ્વાહા મદાપહઃ ॥ ૫૦ ॥

ગર્વગામ્ભીર્યસિંહસ્ય નૃસિંહસ્ય (સર્વદુષ્ટ)વિનાશકૃત્ ।
ગુણોદારો ગુણાધારો હ્રીં ફ્રેં (ફ્રૈં) શબ્દપરાયણઃ ॥ ૫૧ ॥

ઋષીણાં સિદ્ધિકર્તાઽઽત્મા શ્રીં સ્વાહા ધનદાર્ચિતઃ ।
તેજોમયઃ સહસ્રાક્ષો હ્રીં સ્વાહા હવ્યભુક્ સ્વરાટ્ ॥ ૫૨ ॥

ક્લીં ક્લીં ક્લૂં ક્રૈં (ખ્રેં) હ્સ્પ્રેં (હ્સ્ફ્રૌં) હ્સૌં ઐશ્વર્યનિલોઽનલઃ ।
એકપાદો દ્વિપાદશ્ચ બહુપાદશ્ચતુષ્પદઃ ॥ ૫૩ ॥

ક્રીં સ્વાહા શ્રી (શ્રીં)હયગ્રીવો વીરારાધિતપાદુકઃ ।
મારીભૂતમહાપ્રેતવાસુદેવમયો હરઃ ॥ ૫૪ ॥

ભૂતક્રીડા સુરક્રીડા ક્રીડાગન્ધર્વકિન્નરઃ ।
દિવ્યભોગી સુરાપક્ષો હ્રીં હ્રીં ખાં ફટ્ પરં પદઃ ॥ ૫૫ ॥

વ્યાધિહારી વ્યાધિહર્તા વ્યાધિનાશનતત્પરઃ ।

વામી વામમાર્ગનિરતો સિદ્ધસાધ્યસુસિદ્ધિદઃ ॥ ૫૬॥

પુષ્ટિદસ્તુષ્ટિદઃ સ્વામી સમર્થઃ સર્વવીર્યવાન્ ।
ગ્લૌં ગ્લૌં હ્રીં ક્લીં હ્સૌં શ્રીં શ્રીં હૂં હૂં (હું હું) સ્વાહા મહેશ્વરઃ ॥ ૫૭॥

એહિ એહિ મહાવીર એહિ પક્ષીન્દ્ર પક્ષિરાટ્ ।
ઐં પા (ઘા)ણ્ડુવેષો ભગવાન્કાલરૂપી કલાવ (ક)રઃ ॥ ૫૮॥

વરિષ્ઠો ધનદો શિષ્ટા (ષ્ટો)વિશિષ્ટઃ કુલરક્ષકઃ ।
ધર્માધિપો ધર્મમૂર્તિઃ બ્રહ્મ બ્રહ્મવિવર્દ્ધનઃ ॥ ૫૯॥

ઘાં ઘાં ઘોં ઘોં શનિરતો શરભઃ સર્વકામદઃ ।
ક્ષ્રૈં ક્ષ્રૈં શ્રીં હ્રીં હ્સૌં હ્રીં ફટ્ પક્ષીન્દ્રો ભગવાન્હરઃ ॥ ૬૦॥

ક્રૌં ક્રૌં હ્રૌં હ્રૌં હ્સૌં શ્રીં હ્રીં હૂં (હું) ફટ્ શિવઙ્કરઃ ।
શરભઃ કમલાનન્દો ઉગ્રોગ્રઃ પરમેશ્વરઃ ॥ ૬૧॥

ભૂ ભુજઙ્ગમગસ્તિચ્ચ પત્રપૂજાપરિગ્રહઃ ।
મન્દારકુસુમામોદો માલતીકુસુમપ્રિયઃ ॥ ૬૨॥

મ્લીં મ્લીં શ્રીં શ્રીં હ્સૌં હ્સૌં હ્રીં હ્રીં ક્લીં ક્લીં ઇષ્ટાર્થસિદ્ધિદઃ ।
અસિતાઙ્ગો સિતાઙ્ગશ્ચ પીતાઙ્ગઃ પરકૃત્યહા ॥ ૬૩॥

ખૈં ખૈં સ્વાહા સુરશ્રેષ્ઠો વિશ્વાત્મા વિશ્વજીવનઃ ।
રુરુચર્મપરીધાનો રુરુભૈરવવન્દિતઃ ॥ ૬૪॥

ચણ્ડશ્ચણ્ડાઙ્ગચણ્ડાત્મા ચચ્ચચ્ચામરવીજિતઃ ।
હૌં હૌં હૌં (હૌ હૌ) પક્ષિરાજાય પક્ષિરાજાય ક્રૌં સ્વરાટ્ ॥ ૬૫॥

શ્રીં શ્રીં ક્લીં હ્રીં હ્સૌં સ્વાહા યોગીશો યોગિનીપ્રિયઃ ।
કર્ત્તા હર્તા કાલાતીતો કાલ (કાલઃ)સઙ્કર્ષણો ઘનઃ ॥ ૬૬॥

ઉન્મત્તોન્મત્તમર્દશ્ચ (મર્દી ચ) ભૈરવોન્મત્તસંયુતઃ ।
મધુપાની મદાહારી આધારી સર્વદેહિનામ્ ॥ ૬૭॥

માંસભક્ષણકર્તાઽઽત્મા વિશ્વરૂપી મહોજ્જ્વલઃ ।
ઐશ્વર્યદાતા ભગવાન્શ્રી (શ્રીં) શ્રીં લક્ષ્મ્યા પ્રપૂજિતઃ ॥ ૬૮॥

કામદેવકલારામી અભિરામી (કૃતાન્તઃ) શિવનર્તકી ।
મહાપાપહરોદર્ક (ર્કી)વિતર્ક (ર્કી)રાજ્યકૃદ્વશી ॥ ૬૯॥

શ્રીં હ્રીં સ્વાહેશ્વરો દેવો કાલીદુર્ગાવરપ્રદઃ ।
કૌતુકી કૌતુકાયુક્તો કાં કીં સ્વાહા ભયાપહઃ ॥ ૭૦॥

મહાદેવો વિરૂપાક્ષો શૂલપાણિઃ પિનાકધૃક્ ।
શમ્ભુઃ પશુપતિર્દક્ષો દીક્ષિતાનાઞ્જયઙ્કરઃ ॥ ૭૧॥

દાં દાં દીં દીં દ હૌં ડીં ડીં ડિણ્ડિભા વાનરઃ (વારણઃ) પરઃ ।
હ્રીં સ્વાહા પારગોસ્વામી ઢ (ઠ)ણડ્ઢણિતપાતકઃ ॥ ૭૨॥

ઈશ્વરો ઈપ્સિતાર્થાઙ્ગો ઈં ઈં એવતમાતૃકઃ ।
હ્સ્પ્રેં (હ્સ્ફ્રૌં) ખ્ફ્રેં હ્સૌં હ્રીં હ્રીં ક્ષ્મ્રીં ત્રીં શ્રીં
કમલ (મલક)દ્વયલાઞ્છિતઃ ॥ ૭૩॥

શ્રીચક્રરક્ષણોદ્યુક્તો ત્રાં ત્રીં (ત્રીં ત્રી) શત્રુવિમર્દનઃ ।
ગઙ્ગાધરો ગાધમૂર્તિઃ શ્રૂં સ્વાહા સર્વસમ્પદઃ ॥ ૭૪॥

હરો મૃત્યુહરઃ કર્તા વિધાતા વિશ્વતોમુખઃ ।
એકવક્ત્રો દ્વિવક્ત્રશ્ચ ત્રિવક્ત્રઃ પઞ્ચવક્ત્રકઃ ॥ ૭૫॥

ચતુર્વક્ત્રઃ સપ્તવક્ત્રો ષષ્ટવક્ત્રોઽષ્ટવક્ત્રગઃ । (તથૈવશ્ચાષ્ટવક્ત્રગઃ)
નવવક્ત્રો મહાધીરો હ્રીં શ્રીં ખેં ખઃ સહસ્રકઃ (ગઃ) ॥ ૭૬॥

દશવક્ત્રો મહાતેજો કામિનીમદભઞ્જનઃ ।
જ્યેષ્ઠો શ્રેષ્ઠો મહાશ્રેષ્ઠો તથૈકાદશવક્ત્રમિ? ॥ ૭૭॥

સર્વેશ્વરી પરાકાલી સુન્દરી સુરસુન્દરઃ ।
શ્યામચઞ્ચુપુટો દીપ્તો રક્તનેત્રો ભયઙ્કરઃ ॥ ૭૮॥

શ્મશાનવાસી સર્વાત્મા સૈન્યસ્તમ્ભનકારકઃ ।
સેનાનીપૂજિતપદો સેનાપતિજયઙ્કરઃ ॥ ૭૯॥

ક્રોં ગ્રીં ક્લીં ત્રૂં (ભ્રૂં) તથા આં હ્રીં ક્રોં હૂં (હૂં) ફટ્ (ફટ્કાર) સ્વરૂપકઃ ।
કાર્યકર્તા કાર્યવક્તા કાર્યસાધનતત્પરઃ ॥ ૮૦॥

શ્રીં હ્રીં શ્રીં ક્લીં પુનઃ ક્રીં ક્રીં સ્વાહા દુષ્ટાર્થખણ્ડનઃ ।
પરબ્રહ્મસ્વરૂપાત્મા આત્મતત્ત્વમયઃ પુમાન્ (સ્વયં હરઃ)॥ ૮૧॥

વિદ્યાતત્ત્વમયો દેવો શિવતત્ત્વસ્વયંહરઃ ।
સર્વતત્ત્વાર્થતત્ત્વાત્મા કામિન્યાકર્ષણો હરઃ ॥ ૮૨॥

ક્લૈં ક્લૈં ક્લૂં મ્લૂં (હ્રીં) હ્સૂં ક્ષ્મીમ્ ।

શ્રીં શ્રીં શ્રીં ક્રીં ક્રીં ફટ્ પરમં પદઃ ।
વ્યાધિહારી વિહારી ચ ક્રોધાદ્રાજ્યવિનાશનઃ ॥ ૮૩ ॥

રુધિ (ચિ)રાહારસન્તુષ્ટો રક્તપઃ (રરૂપઃ) પરમોઽવ્યયઃ ।
પુણ્યાત્મા પાપનષ્ટાત્મા કાલભૈરવભૈરવઃ ॥ ૮૪ ॥

દ્વિજિહ્વઃ પઞ્ચજિહ્વાખ્યઃ સપ્તજિહ્વઃ સનાતનઃ ।
હૂં હૂં હૂઙ્કારચેતાત્મા (હૂં હૂં હૂં વેગાત્મા) ખેં ખેં ખણ્ડાયુધાન્વિતઃ ॥ ૮૫ ॥

ભ્ક્લીં ભ્ક્લીં શ્રીં હ્રીં હ્સૌં ક્લીં ક્લીં હ્રીં હૂં સ્વાહા મહાબલી ।
કપાલી કપિલાધારી કૂં કૂં કૂં ભગવાન્ભવઃ ॥ ૮૬ ॥

સિદ્ધ્યા (દ્ધા)દિસેવિતઃ શ્રીં શ્રીં હ્રૌં હ્રૌં સ્વાહા જગન્મયઃ ।
ચિન્મયશ્ચિત્કલાકાન્તઃ ચૈતન્યાત્મા પ્રતાપયુક્ ॥ ૮૭ ॥

કૂં વ્રૂં હૂં (હૂં) શ્રૂં હ્સૌં હૌં હૌં (હ્રૌં હ્રૌં) ૐ શિવાય નમઃ પદમ્ ।
ત્રિનેત્રઃ પરમાનન્દો હ્રીં ફટ્ સ્વાહા સુરવરઃ (સ્વરોવરઃ) ॥ ૮૮ ॥

વરદો વરદાધીશો વાયુવાહનવાહકઃ ।
વૃષભારૂઢસર્વાત્મા હૂં હૂં હૂં પરમેશ્વરઃ ॥ ૮૯ ॥

શ્રીં હ્રીં હ્રીં હ્રીં હ્રૌં ક્રીં હ્રીં શ્રીં શ્રીં સ્વાહામયો ગુરુઃ ।
બૃહસ્પતિસ્વરૂપાત્મા ઇન્દ્રાત્મા ચન્દ્રશેખરઃ ॥ ૯૦ ॥

ચન્દ્રચૂડશ્ચન્દ્રધારી (ચન્દ્રશ્ચન્દ્રાર્ધધારી ચ) ચન્દ્રાર્ધકૃતશેખરઃ ।
તામ્બૂ (મ્બુ)લચર્વણીધાતા રક્તદન્તઃ સુરોહિતઃ ॥ ૯૧ ॥

કઙ્કાલધારી મુણ્ડાત્મા રુણ્ડમાલાધરઃ શિવઃ ।
વ્યાઘ્રામ્બરધરો ધાતા હર્તા સંસારસાગરઃ ॥ ૯૨ ॥

યમરાજભયત્રાસનાશનઃ સર્વકામુકઃ ।
ભ્ર (ભૃ)ષ્ટકર્તા અસુરદ્વેષ્ટા દેવાનામભયઙ્કરઃ ॥ ૯૩ ॥
સઙ્ગ્રામવા (ચા)રી ધર્માત્મા સઙ્ગ્રામે જયવર્ધનઃ ।
રાજદ્વારે સભામધ્યે રાજરાજેશ્વરઃ શિવઃ ॥ ૯૪ ॥

હ્રીં ક્લૈં (ક્લીં) ક્લીં ક્લૂં હ્સ્રૈં (હ્સ્ક્રૈં) ઐં મોહનઃ સર્વભૂભુજામ્ ।
વિશ્વરૂપો વિશામ્ભોક્તા યોગોઽષ્ટાઙ્ગ (યોગાષ્ટાઙ્ગ)નિષેવિતઃ ॥ ૯૫ ॥

જયરુદ્ર (રૂપ) મહાભાગ વીરવીરાધિપોજ્જ્વલ ।
ઐં ફટ્ હ્રીં ફટ્ શિવઃ ત્રીં ફટ્ ક્રીં ફટ્ હૂં ફટ્ કરઃ પરઃ ॥ ૯૬ ॥

ભસ્માસુરેન્દ્રવરદો ભસ્માસુરવિનાશકઃ ।
પઞ્ચાવા (પઞ્ચાંવી)નવનાથાત્મા ષડાધારમયો હરઃ ॥ ૯૭॥

ષડ્દર્શનસમઃ પુણ્યઃ શ્રીં હ્રીં ક્લીં પુણ્યદર્શકઃ ।
અકારાદિક્ષાકારાન્તો વર્ણમાત્રાર્થમાત્રકઃ ॥ ૯૮॥

આં આં ઈં ઈં ક્ષ્રૌં હ્રીં શ્રીં સૌઃ (સૌં) શિવઃ પાપખણ્ડનઃ ।
જાં ક્લીં જ્લૂં ક્લીં હ્સૌં સૌં હૌં શ્રીં સ્વાહા ઈશઃ પરાત્પરઃ ॥ ૯૯॥

એકાહિકો દ્વ્યાહિકશ્ચ તૃતીયશ્ચ ચતુર્થકઃ ।
સર્વજ્વરહરોદર્કો જ્વરબાધાનિવારણઃ ॥ ૧૦૦॥

રાજચૌરાગ્નિબાધા ચ હ્રીં (ક્રીં) હૂં શમનકારકઃ ।
ગ્રીં હ્સ્ક્ષ્રૈં હ્રૌં હ્રીં હ્સૌં (હ્રૌં) હ્રીં ફટ્ સ્વાહા શઙ્કરશઙ્કરઃ ॥ ૧૦૧॥

મહારાજાધિરાજશ્ચ રાજરાજોઽખિલેશ્વરઃ ।
ક્ષ્રીં છ્રૌં હ્રીં ફટ્ શિવાયેતિ શરભાય નમો નમઃ ॥ ૧૦૨॥
ભીષણાય ત્રિશાશાખાય આદિમધ્યાન્તવર્જિતઃ ।
આદિવિદ્યા મહાવિદ્યા ક્લીં છ્રીં હ્રીં ખ્રૈં હ્સ્પ્રૈં (હ્સૌં) હરઃ ॥ ૧૦૩॥

હૂં હૂં સ્વાહા અમેયાત્મા વરદો વરદેશ્વરઃ ।
નિષ્કલઙ્કો વેદ (યદા)વક્તા વક્તા શાસ્ત્રસ્ય બુદ્ધિમાન્ ॥ ૧૦૪॥

કર્તા કારણમીશાનો ભૂર્ભુવઃસ્વઃ સ્વરૂપકઃ ।
કુલ (કલ)માર્ગરતઃ કૌલઃ કૌલિકાનાં ધનપ્રદઃ ॥ ૧૦૫॥

સુખરાશિનિધાનાત્મા વિજ્ઞાનઘનસાધનઃ ।
કાલૌ કલ્મષહર્તાઽઽત્મા દુષ્ટમ્લેચ્છવિનાશનઃ ॥ ૧૦૬॥

હૂં ખેં ખેં ખેં હ્રીં હ્સૌં હૌં શ્રીં ક્લીં ગ્રીં હ્રીં હ્રીં નમો નમઃ ।
સ્વાહા સર્વાગમાચારી (રો) વિચારી પરમેશ્વરઃ ॥ ૧૦૭॥

કાશી માયા તથાઽયોધ્યા મથુરા કાન્ત્યવન્તિકા ।
નિવાસી સર્વતીર્થાત્મા કોટિતીર્થપ (પ્ર)દાશ્રયઃ ॥ ૧૦૮॥

ગઙ્ગાસાગરસિન્ધુશ્ચ પ્રયાગો પુષ્કરપ્રિયઃ ।
નૈમિષી નૈમિષારણ્યી નૈમિષારણ્યવાસિનઃ ॥ ૧૦૯॥

પુષ્કરી પુષ્કરાધ્યક્ષો કુરુક્ષેત્રી ચ કૌરવઃ ।
ગોદાવરી ગયા ચૈવ શ્રીગિરિઃ પર્વતાશ્રયઃ ॥ ૧૧૦॥

ગુહાનિવાસી ભગવાન્ શરભઃ કમલેક્ષણઃ ।
નૃસિંહગર્વહર્તાऽऽત્મા શુદ્ધાચારરતઃ સદા ॥ ૧૧૧॥

સર્વધર્મમયો ધીરો સર્વદેવ (વેદ)મયઃ શિવઃ ।
હ્રીં ફટ્ ક્રીં ફટ્ નમઃ ખેં ફટ્ મન્ત્રાનાં સિદ્ધિસમ્પદઃ ॥ ૧૧૨॥

ઇતિ નામ્નાં સહસ્રાખ્યાં શરભસ્ય મહાત્મનઃ ।
પૂજાકાલે નિશિથે ચ મધ્યાહ્ને પ્રપઠેત્પ્રિયે ॥ ૧૧૩॥

પ્રાતઃકાલે ચ સન્ધ્યાયાં સ ભવેત્સમ્પદાં પદમ્ ।
ભૌમાવસ્યાં ચતુર્દશ્યાં સંક્રાન્તૌ  રવિભૌમયોઃ ॥ ૧૧૪॥

યઃ પઠેદ્ભક્તિસંયુક્તો તસ્ય સિદ્ધિર્નસંશયઃ ।
શનિમઙ્ગલવારે ચ ઉર્ધ્વદૃષ્ટિઃ પઠેન્નરઃ ॥ ૧૧૫॥
સ ભવેત્પાર્વતીપુત્રો સર્વશાસ્ત્રવિશારદઃ ।
રાજાનો દાસતાં યાન્તિ ભવેત્સર્વજનપ્રિયઃ ॥ ૧૧૬॥
અસિતાઙ્ગો રુરુશ્ચણ્ડો ક્રોધશ્ચોન્મત્તભૈરવઃ ।
કપાલી ભીષણશ્ચૈવ સ્વયમ્ભૈવભૈરવઃ ॥ ૧૧૭॥
યે યે પ્રયોગાસ્તન્ત્રેષુ તૈસ્તૈસાધય યત્ફલમ્ (તેષુ તૈસ્સાધયેત્ફલમ્) ।
તત્ફલં લભતે ક્ષિપ્રં નામસાહસ્રપાઠતઃ ॥ ૧૧૮॥
ભૂતપ્રેતપિશાચશ્ચ વેતાલા સિદ્ધિચેટકાઃ (સિદ્ધચેષ્ટકાઃ ।
તે સર્વે વિલયં યાન્તિ સાધકસ્યાસ્ય દર્શનાત્ ॥ ૧૧૯॥
સિંહા ઋક્ષા વાનરાશ્ચ વ્યાઘ્રાસ્સર્પા વરાહકાઃ ।
ગજોષ્ટ્રાક્રૂરસત્ત્વાશ્ચયેચાન્યેવિષધારિણઃ ॥ ૧૨૦॥

તે સર્વે વિલયં યાન્તિ સાધકાસ્યાસ્ય દર્શનાત્ ।
અષ્ટમ્યાં વા ચતુર્દશ્યાં નવમ્યાં ગુરુસંયુતમ્ (તઃ) ॥ ૧૨૧॥

પૂજયેત્પરયા ભક્ત્યા સ ભવેત્સમ્પદાપદમ્ (ભવેયુસ્સર્વસમ્પદાઃ) ।
યો નિન્દાં કુરુતે નિત્યં નામસાહસ્રપાઠકે ॥ ૧૨૨॥

તે દુષ્ટા નાશમાયાન્તિ સ્વકર્મસ્યા (સ્વકર્મણોऽ)પરાધતઃ ।
મોહનસ્તમ્ભનાકર્ષમારણોચ્ચાટનાદિકમ્ ॥ ૧૨૩॥

પાઠમાત્રેણ સિદ્ધ્યન્તિ એતત્સત્યં ન સંશયઃ ।
શ્મશાનાઙ્ગારમાહૃત્ય (નાઙ્ગારમાદાય) સપર્યાં કુજવાસરે ॥ ૧૨૪॥

સાધ્ય (ધ્વ)નામલિખેન્મધ્યે પીતસૂત્રેણવેષ્ટયેત્ ।

નિઃક્ષિપેચ્છત્રુભવને તસ્ય નશ્યન્તિ સમ્પદઃ ॥ ૧૨૫॥

પુત્રનાશં કીર્તિનાશં ધનનાશં ગૃહક્ષયમ્ ।
ક્ષયઃ સર્વકુટુમ્બાનાં ભૂયાત્સત્યં ન સંશયઃ ॥ ૧૨૬॥

ગોપનીયમિદં તન્ત્રં સદ્યઃ પ્રત્યયકારકમ્ ।
ન દેયં યસ્ય કસ્યાપિ દત્વા સિદ્ધિક્ષયો ભવેત્ ॥ ૧૨૭॥

સ્વમાતૃયોનિવદ્ગોપ્યા વિદ્યૈષેત્યાગમા જગુઃ ।
પઠનીયમિદં નિત્યં આત્મનઃ શ્રેય ઇચ્છતા ।
ન મુઞ્ચતિ ગૃહં તસ્માલ્લક્ષ્મી વાણી સદૈવ હિ ॥ ૧૨૮॥

॥ ઇતિ શ્રીઆકાશભૈરવકલ્પે ઉમામહેશ્વરસંવાદે
શરભેશ્વરસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Words between parentheses are variations found in different manuscript.

Encoded by Ravin Bhalekar ravibhalekar@hotmail.com
Proofread by Ravin Bhalekar, PSA Easwaran

*Shri Sharabha Sahasranama Stotram*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*